श्रीः

व्योमसंस्कृतपाठशाला

लघुसिद्धान्तकौमुदी

08.01.2014

हल्सन्धिप्रकरणम्

Class No - 31

मङ्गलश्लोकाः

येनाक्षरसमाम्नायमधिगम्य महेश्वरात् ।
कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः ॥

वाक्यकारं वररुचिं भाष्यकारं पतञ्जलिम् ।
पाणिनिं सूत्रकारं च प्रणतोऽस्मि मुनित्रयम् ॥

नत्वा सरस्वतीं देवीं शुद्धां गुण्यां करोम्यहम् ।
पाणिनीयप्रवेशाय लघुसिद्धान्तकौमुदीम् ॥

गुरुरेव गतिः गुरुमेव भजे गुरुणैव सहास्मि नमो गुरवे ।
न गुरोः परमं शिशुरस्मि गुरोः मतिरस्ति गुरौ मम पाहि गुरो ॥

ओं नमः पाणिनि-कात्यायन-पतञ्जलिभ्यः शब्दविद्यासम्प्रदायप्रवर्तकेभ्यः
मुनिभ्यः नमो महद्भ्यः नमो गुरुभ्यः ॥

vyóma ॥ वाचं धेनुमुपासीत ॥

अनुस्वारस्य ययि परसवर्णः(८.४.५७)

❖ अनुस्वारस्य ६. १, ययि ७. १, पर – सवर्णः १.१

❖ स्पष्टम् । शान्तः

व्याख्या –

❖ एतद् विधिसूत्रम् अस्ति ।

❖ अस्मिन् सूत्रे पदत्रयं वर्तते – अनुस्वारस्य, ययि, पर – सवर्णः इति ।

❖ अनुस्वारस्य – षष्ठी = अनुस्वारस्य स्थाने

❖ ययि – सप्तमी = यय्-वर्णे परे

❖ परसवर्णः – प्रथमा = विधेयः = परसवर्णः आदेशः स्यात्

❖ अस्य सूत्रस्य अर्थः भवति – ययि ("यय्' – प्रत्याहारे समाविष्टे कवर्ग – चवर्ग – टवर्ग – तवर्ग – तवर्ग – पवर्गेषु ह्, य्, व्, र्, ल् इत्येतेषु वर्णेषु च) परतः अव्यवहितपूर्ववर्तिनः अनुस्वारस्य स्थाने परसवर्णः आदेशः भवति ।

vyomam ॥ वाचं धेनुमुपासीत ॥

अनुस्वारस्य ययि परसवर्णः (८.४.५८)

- नासिकास्थानसाम्यात् वर्गाणां पञ्चमवर्णाः अनुस्वारस्य आदेशा भवन्ति
  - शां+तः = शान्तः
  - गुं+फितः = गुम्फितः
  - अं + कितः = अङ्कितः
  - अं+चितः = अञ्चितः
  - कुं+ठितः = कुण्ठितः

vyoma
॥ वाचं धेनुमुपासीत ॥

वा पदान्तस्य (८.४.५९)

- (वा अ., पदान्तस्य ६.१)
- त्वङ्करोषि, त्वं करोषि ।

- व्याख्या –
- एतद् विधिसूत्रम् अस्ति ।
- अत्र अनुस्वारस्य ययि परसवर्णः इति सूत्रात् परसवर्णः इति पदम् अनुवर्तते । एवं सति ययि {"यय्' प्रत्याहारे समाविष्टेषु कवर्ग – चवर्ग – टवर्ग – तवर्ग – तवर्ग – पवर्गेषु ह्, य्, व्, र्, ल् इत्येतेषु वर्णेषु च} परतः अव्यवहित – पूर्ववर्तिनः पदान्तस्य अनुस्वारस्य स्थाने विकल्पेन परसवर्णः आदेशः भवति इति अस्य सूत्रस्य अर्थः ।

वा पदान्तस्य (८.४.५९)

यथा –

- त्वङ्करोषि / त्वं करोषि – "त्वं + करोषि' इत्यत्र 'त्वं' इत्यस्य "सुप्तिङन्तं पदम्' इत्यनेन पदसंज्ञायां सत्यां "वा पदान्तस्य ' इत्यनेन "यय्' – वर्णे ककारे परतः पदान्ते अनुस्वारस्य परसवर्णः इति आदेशः विकल्पेन प्राप्तः।
- "स्थानेऽन्तरतमः' इति परिभाषायाः सहाय्येन अनुनासिकधर्मयुक्तः ङकारः आदेशः भूत्वा "त्वङ्करोषि' इति प्रयोगः जायते।
- यदा 'वा पदान्तस्य' इत्यनेन पदान्ते अनुस्वारस्य स्थाने परसवर्णः आदेशः न भवति तदा "त्वं करोषि' इत्येव प्रयोगः जायते।

तोर्लि (८.४.५९)

(तोः ६.१ लि ७.१)

❖ **तवर्गस्य लकारे परे परसवर्णः। तल्ल्ययः। विद्वाँल्लिखति। नस्यानुनासिको लः।**

❖ **व्याख्या -** एतद् विधिसूत्रम् अस्ति।

❖ अत्र अनुस्वारस्य ययि परसवर्णः इति सूत्रात् परसवर्णः इति अनुवर्तते। एवं लकारे परतः अव्यवहितस्य पूर्ववर्तिनः तवर्गस्य स्थाने परसवर्णः {लकारस्य सवर्णः} आदेशः भवति इति अस्य सूत्रस्य अर्थः।

यथा –

❖ तल्लयः – "तद् + लयः' इत्यत्र लकारे परतः तवर्गीयवर्णस्य दकारस्य स्थाने परसवर्णः {लकास्य सवर्णः} लकारः आदेशः भूत्वा "तल्लयः' इति प्रयोगः जायते।

❖ विद्वाँल्लिखति – "विद्वान् + लिखति' इत्यत्र लकारे परतः तवर्गीयवर्णस्य नकारस्य स्थाने परसवर्णः {लकारस्य सवर्णः} अनुनासिक – धर्मयुक्तः "लँ' इति आदेशः भूत्वा "विद्वाँल्लिखति' इति प्रयोगः सिद्ध्यति।

vyoma ॥ वाचं धेनुमुपासीत ॥

मो राजि समः क्वौ (८.३.२५)

- मः १.१ राजि ७.१ समः ६.१ क्वौ ७.१ ।
- क्विबन्ते राजतौ परे समो मस्य म एव स्यात् । सम्राट् ।

व्याख्या –

- एतद् विधिसूत्रम् अस्ति ।
- अस्मिन् सूत्रे पदचतुष्टयं वर्तते – मो, राजि, समः, क्वौ इति ।
- अत्र मोऽनुस्वारः इति सूत्रात् मः इति पदम् अनुवर्तते ।
- एवं सति क्विबन्ते "राज्' – धातौ परतः पूर्ववर्तिनः समः अवयवस्य मकारस्य स्थाने मकारः एव आदेशः भवति, अनुस्वारः आदेशः न भवति इति अस्य सूत्रस्य अर्थः ।

यथा –

- साम्राट् – "सम् + राट्' इत्यत्र ("राट्' शब्दः "राज्' – धातोः "क्विप्' – प्रत्यये सति षत्व – जश्त्वादीनि कार्याणि भूत्वा सम्पद्यते) "मोऽनुस्वारः' इत्यनेन प्राप्तम् अनुस्वारादेशं बाधित्वा "मो राजि समः क्वौ' इत्यनेन सूत्रेण क्विबन्ते "राट्' इति परतः समः मकारस्य स्थाने मकारादेशः भूत्वा "सम्राट्' इति प्रयोगः जायते ।
- 'मोऽनुस्वार' इत्यस्य अपवादः ।

vyoma ॥ वाचं धेनुमुपासीत ॥

हे मपरे वा (८.३.२६)

- हे ७.१ मपरे ७.१ वा – अ.)
- मपरे हकारे परे मस्य मो वा। किम्ह्म्लयति, किं ह्म्लयति।

व्याख्या –

- एतद् विधिसूत्रम् अस्ति। अस्मिन् सूत्रे पदत्रयं वर्तते – हे, मपरे, वा इति।
- अत्र मोऽनुस्वारः इति सूत्रात् मः इति तथा मो राजि समः क्वौ इति सूत्रात् च मः इति पदम् अनुवर्तते।
- मः – षष्ठी = मकारस्य स्थाने, मः – प्रथमा = मकार एव स्यात्
- मपरे हे – सप्तमी = मकारपरे हकारे, वा = विकल्पेन
- एवं सति मकारपरे हकारे परतः पूर्ववर्तिनः मकारस्य स्थाने विकल्पेन मकारादेशः भवति इति अस्य सूत्रस्य अर्थः।

vyoma ॥ वाचं धेनुमुपासीत ॥

हे मपरे वा (८.३.२६)

यथा –

- **किम् ह्मलयति** – "किम् + ह्मलयति' इत्यत्र **'मोऽनुस्वारः'** इत्यनेन नित्यम् अनुस्वारादेशः प्राप्तः। तस्य अपवादत्वात् "हे मपरे वा' इत्यनेन सूत्रेण मकारपरे हकारे परतः पूर्ववर्तिनः मकारस्य स्थाने मकारः आदेशः विकल्पेन भूत्वा "किम् ह्मलयति' इति प्रयोगः जायते।

- **किं ह्मलयति** – "किम् + ह्मलयति' इत्यत्र यदा **'हे मपरे वा'** इत्यनेन मकारेस्य वैकल्पिकः आदेशः न भावति तदा "मोऽनुस्वारः' इत्यनेन हलि परतः पदान्त – मकारस्य अनुस्वारः आदेशः भूत्वा 'किं ह्मलयति' इत्येव प्रयोगः जायते।
- इदमत्र अवधेयं यत् इदं सूत्रम् "मोऽनुस्वारः' इत्यस्य सूत्रस्य वैकल्पिकः अपवादः अस्ति।

यवलपरे यवला वा {वार्तिकम्}

- (यवल – परे ७.१ यवला १.३ वा – अ.)
- **किय्ँ ह्यः, किं ह्यः. किव्ँ ह्वलयति, किं ह्वलयति, किल्ँ ह्लादयति, किं ह्लादयति ।**

व्याख्या –

- एतद् वार्तिकम् अस्ति ।
- अस्मिन् वार्तिके पदत्रयं वर्तते - यवल – परे, यवला, वा इति ।
- अत्र मोऽनुस्वारः इति सूत्रात् अनुस्वारः इति पदम् अनुवर्तते तथा च हे मपरे वा इति सूत्रात् 'हे' इति पदम् अनुवर्तते ।
- एवम् अस्य सूत्रस्य अर्थः भवति – मकारस्य स्थाने यकारपरे हकारे परतः यकारः आदेशः, वकारपरे हकारे परतः वकारः आदेशः, लकारे हकारे परतः लकारः च आदेशः विकल्पेन भवति ।

vyoma ॥ वाचं धेनुमुपासीत ॥

यवलपरे यवला वा {वार्तिकम्}

यथा –

कियँ ह्यः –

- "किम् + ह्यः' इत्यत्र "मोऽनुस्वारः' इत्यनेन हलि परतः पदान्ते मकारस्य स्थाने अनुस्वारादेशः प्राप्तः।
- तस्य अपवादत्वात् "यवलपरे यवला न' इत्यनेन वार्तिकेन यकारपरे हकारे "ह्यः' इति परतः मकारस्य स्थाने यकारः आदेशः विहितः।
- यकारस्य सानुनासिकभेदस्य विद्यमानत्वात् "स्थानेऽन्तरतमः इति परिभाषया मकारस्य स्थाने सानुनासिकः यँकारः आदेशः विकल्पेन भूत्वा 'कियँ ह्यः' इति प्रयोगः जायते।

किं ह्यः –

- "किम् + ह्यः' इत्यत्र यवलपरे यवला वा' इत्यनेन मकारस्य स्थाने वैकल्पिकः यँकारदेशः{यँ) न भवति तदा "मोऽनुस्वारः' इत्यनेन अनुस्वारादेशः भूत्वा "किं ह्यः' इति प्रयोगः जायते।

यवलपरे यवला वा {वार्तिकम्}

यथा –

किवँ ह्वलयति –

- "किम् + ह्वलयति' इत्यत्र "मोऽनुस्वारः' इत्यनेन मकारस्य स्थाने प्राप्तम् अनुस्वारादेशं बाधित्वा "यवलपरे यवला वा' इत्यनेन वकारपरे हकारे परतः मकारस्य स्थाने वकारादेशः विहितः।
- वकारस्य अनुनासिकभेदस्य विद्यमानत्वात् "स्थानेऽन्तरतमः' इति परिभाषया सानुनासिकस्य मकारस्य स्थाने सानुनासिकः वकार "वँ' इति आदेशः भूत्वा "किवँ ह्वलयति' इति प्रयोगः जायते।

किं ह्लादयति' -

- यदा 'किम् + ह्वलयति' इत्यत्र "यवलपरे यवला वा' इत्यनेन वकारादेशः न भवति तदा "मोऽनुस्वारः' इत्यनेन मकारस्य स्थाने अनुस्वारादेशः भूत्वा "किं ह्वलयति' इति प्रयोगः जायते।

vyóma ॥ वाचं धेनुमुपासीत ॥

यवलपरे यवला वा {वार्तिकम्}

यथा –

- लकारादेशः विकल्पेन विहितः ।

- लकारस्यापि अनुनासिकभेदस्य विद्यमानत्वात् मकारस्य स्थाने सानुनासिकः लकारः “लँ’ इति आदेशः भूत्वा “किलँ ह्लादति’ इति प्रयोगः जायते ।

किं ह्लादयति –

- यदा “किम् + ह्लादयति’ इत्यत्र ‘यवलपरे यवला वा’ इत्यनेन वैकल्पिकः लकारादेशः न भवति तदा “मोऽनुस्वारः’ इत्यनेन मकारस्य अनुस्वारादेशः भूत्वा किं ह्लादयति’ इत्येव प्रयोगः जायते ।

नपरे नः (८. ३. २७)

- (नपरे ८.१, नः १.१)
- **नपरे हकारे मस्य नो वा. किन्हनुते, किं ह्नुते**

व्याख्या –

- एतद् विधिसूत्रम् अस्ति।
- अस्मिन् सूत्रे पदद्वयं वर्तते – नपरे, नः इति।
- अत्र मोऽनुस्वारः इति सूत्रात् मः इति पदम् अनुवर्तते तथा च हे मपरे वा इति सूत्रात् 'हे, वा' इति च पदद्वयम् अनुवर्तते।
- नकाराद् अकारः उच्चारणार्थः।
- एवं सति नकारपरे हकारे परतः मकारस्य स्थाने विकल्पेन नकारः भवति इति अस्य सूत्रस्य अर्थः।

vyóma ॥ वाचं धेनुमुपासीत ॥

नपरे नः (८. ३. २७)

यथा –

- किन्ह्नुते / किं ह्नुते – “किम् + ह्नुते’ इत्यत्र “मोऽनुस्वारः’ इत्यनेन प्राप्तं पदान्तमकारस्य अनुस्वारादेशं बाधित्वा “नपरे नः’ इत्यनेन नकारपरे हकारे परतः मकारस्य स्थाने विकल्पेन नकारः आदेशः भूत्वा “किन्ह्नुते’ इति प्रयोगः जायते।

- यदा “नपरे नः’ इत्यनेन वैकल्पिकः नकारादेशः न भवति तदा “मोऽनुस्वारः’ इत्यनेन मकारस्य अनुस्वारादेशः भूत्वा “किं ह्नुते’ इत्यापि प्रयोगः जायते।

धन्यवादाः

vyoma
॥ वाचं धेनुमुपासीत ॥